मात्रेण अभिहतप्रधानगुरुद्रव्यसंयोगेनैव उत्पतनदर्शनात् यथा भूम्यादौ हस्तेन वेगक्षिप्तलोष्टादेर्हस्तयोगं विनाऽपि उत्पत्तिर्दृश्यतेऽत उत्पतने अभिघात एव असमवायिकारणम् "अभिघातात् मुषले संयोगाद्धस्ते कर्म" वै०सू० अभिघातात् अभिघातजनितसंस्कारजनितात् हस्तमुषलसंयोगात् हस्ते उत्पतनं कर्म तत्र मुषलसंयोगोऽसमवायिकारणम्। तीव्रवेगप्रयुक्तक्रियाजनितः संयोगः शब्दहेतुः। "तृतीयः स्यात् कर्म्मजोऽपि द्विधैव परिकीर्त्तितः अभिघातोनोदनञ्च शब्दहेतुरिहादिमः। शब्दाहेतुर्द्वितीयः स्यादिति" "शब्दोध्वनिश्च वर्णश्च मृदङ्गादिभवोध्वनिः। "कण्ठसंयोगादिजन्यावर्णास्ते कादयोमता" इति च भाषा० अतएवोक्तम् "कण्ठताल्वाद्यभिघातजन्यः शब्दः" इति वृद्धैः। शिक्षायामप्युक्तम् "आत्मा बुद्ध्या समेत्यार्थान् मनोयुङ्क्ते विवक्षया। मनः कायाग्निमाहन्ति स प्रेरयति मारुतम्। सोदीर्णो मूर्द्ध्न्यभिहतो वक्त्रमापद्य मारुतः वर्णान् जनयते" इति। स उदीर्णः सन्धिः पादपूरणार्थः। मृदङ्गादौ तीव्रवेगेन काष्ठादिताड़नसंयोगे शब्दोजन्यते इति लोके प्रसिद्धिः। वृक्षादौ प्रवलतरवायुसंयोगाच्च शब्दो ध्वन्यात्मक एव। मृदुवेगेन क्रियया संयोगे नोदनरूपे न शब्दः इति तस्य शब्दाहेतुत्वमुक्तम् अधिकं नोदनशब्दे वक्ष्यते। "अभिघातोऽस्त्यस्य अर्श०अच्। अभिघातयुक्ते त्रि० "अभिघातं स्यात् पूर्व्वं वेदद्वित्रादिवर्णाश्चेत्। नववर्गाणां नवतो धरणीचन्द्रद्विरामाद्या" इति केरलोक्ते वर्णभेदे, न० शब्दकल्पद्रुमः।

**अभिघातक** त्रि० अभि+हन–ण्वुल्। १शत्रौ रिपौ २अभिघातसंयोगकारके ३समूलनाशके च। "तदभिघातके हेतौ" सां०का०। [इन्। रिपौ।

**अभिघाति** पु० अभिघातयति अभि–हन–स्वार्थे णिच–

**अभिघातिन्** त्रि०अभि+हन–णिनि स्त्रियां ङीप्। १शत्रौ २नाशके ३अभिघातसंयोगकारके च।

**अभिघार** पु० अभिघार्य्यते समन्तादग्नौ सिच्यते अभि+घृ–क्षरणे णिच–भावे घञ्। अग्नौ समन्तात् घृतादेः १सेचने २ घृतादिसंस्कारभेदे च। "तदभिहितोभावो द्रव्यवत् प्रकाशते" इत्युक्तेः अभिघार्य्यमाणे ३घृतादौ च निरु०।

**अभिघारण** न० अभितोघारणम् जलादिभिः विधिना सेचनम्। अभि+घृ–णिच्–भावे ल्युट्। घृतादेः संस्कारभेदे "एत्य जुह्वामभिघारणम् ध्रुवाया हविष उपभृतश्च" कात्या० ३,२,८, "पञ्चप्रयाजहोमानन्तरं यजतिस्थानादेत्य वेदेः पश्चादागत्य उपविश्य जुह्वस्थेनैव प्रयाजशेषेण ध्रुवाया ध्रौवस्याज्यस्य हविषः आज्यस्थाल्याज्यपुरोडाशयोश्च उपभृतः उपभृत्संस्थस्याज्यस्य अध्वर्युरभिघारणं करोति उपयोगक्रमेण अयञ्च हविःसंस्कारः प्रयाजशेषप्रतिपत्तिः हवींषीति द्वितीयाश्रुतेःहविषः संस्कार्य्यत्वावगमात् अतः सन्निहितानि सर्व्वाणि हवींषि शेषेणाभिघारणीयानि" कर्क०

**अभिचक्षण** अभि–चक्ष–ल्यु। १ सर्व्वतोविचक्षणे कर्मकुशले "वेदाहं तस्य भेषजं शीपुद्रुरभिचक्षणम्" अथ० ६,१२७,२, विषूचीर्य्यवितोराशा अभिचक्षणादिवः अथ० ८,२,२१।

**अभिचर** त्रि० अभितः आभिमुख्येनानुकूल्यार्थं चरति चर–ट। १ भृत्ये २ अभितो गते च स्त्रियां ङीप्।

**अभिचरण** न० अभि+चर–ल्युट्। १ शत्रुघाताय विहितश्येनयागादौ।

**अभिचरणीय** त्रि० अभिचरणमर्हति छ। १ अभिचारार्हे वैरिणि "तं त्वष्टा हतपुत्रोऽभ्यचरत् सोऽभिचरणीयमपेन्द्रम् सोममाहरत्" शत० ब्रा०।

**अभिचार** पु० अभि–आभिमुख्येन कृत्याजननार्थं चारः अभि+चर–भावे घञ्। १ शत्रुबधोत्पादककृत्याजनके मूलकर्मणि "श्येनेनाभिचरन् यजेतेति" विहिते श्येनयागादौ। "अभिचारेषु सर्व्वेषु कर्त्तव्यो द्विशतोदमः" "अभिचारमहीनञ्च त्रिभिः कृच्छ्रैर्व्यपोहति" इति च मनुः "अभिचारक्रियाक्रूरैकप्रकृतयः पुरोधसः" काद०। अभिचाराय हितं स प्रयोजनमस्य वा ठञ्। आभिचारिकः। १तत्रहितकर्म्मादौ २तत्रत्यमन्त्रादौ च त्रि०स्त्रियां ङीप्।

**अभिचारकल्प** पु० अभिचारसाधनं कल्पोरहस्यज्ञापकग्रन्थः। १ अथर्ववेदान्तर्गते ग्रन्थभेदे अथर्ववेदशब्दे विवरणम्।

**अभिचारिन्** त्रि० अभिचरति अभि+चर–णिनि स्त्रियां ङीप्। १अभिचारकर्त्तरि "ये त्वा कृत्वा लेभिरे विद्वला अभिचारिणः" अथ० १०,१,८।

**अभिच्छाय** त्रि० अभिगतम्छायाम् अत्या०स०, अभिमुखीभूता छाया यस्य वा। १छायाप्राप्ते २छायाभिमुखप्राप्ते च। छायाया अभिमुखम् अव्ययी०। ३छायाभिमुख्ये अव्य०। "यो माभिच्छायमत्येषि मां चाग्निं चान्तरा" अथ० १२,१,५७।

**अभिजन** पु० अभिजायतेऽस्मिन् जन+आधारे–घञ् अवृद्धिः। १ कुले, "न परिचयं रक्षति नाभिजनमीक्षते" काद०। "वयसः कर्मणोऽर्थस्य श्रुतस्याभिजनस्य च वेशवाग्बुद्धिसारूप्यमाचरन् विचरेदिह" मनुः। २ जन्मभूमौ,